पूर्व्वजन्मार्ज्जितहरिसेवाभ्यासभाववशात् हरिस्तवनमेव तदुपायतया संचिन्त्य तस्य स्तवने कृते हरिणा तस्य तस्मो विमोक्षणं कृतं तेनैव च दिव्यगतिलाभश्च तस्य जात इत्येषा कथा तत्रैव ३० अ० स्थिता दिग्मात्रं ततः उदाह्रियते ।

"छ्यणो करेणुं करभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया । तं तत्र कश्चिन्नृप! दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत्। यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे । यथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा । विचक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् । नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्म्मिथः । समाः सहस्रं व्यगमन्महीपते ! सप्राणयोश्चित्रममंसतामराः । ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः । विकृष्यमाणस्य जलेऽवसीदतो विपर्य्ययोऽभूत् सकलं जलौकसः । इत्थं गजेन्द्रः स यदाप सङ्कटं प्राणस्य देही विवशो यदृच्छया । अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत । न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् । ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् । यः कश्चनेशोबलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशम् । भीतं प्रपन्नं परिपाति, यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि"। भा० ८।२ अ० ।

ततः तत्कृतस्तुतिस्तुपवर्ण्य ३अ० शेषे, हरिणा ततो गजेन्द्रस्य मोक्षणमुक्तं यथा

एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् । तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः। छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः । सोऽन्तःसरस्युरुबलेन गृहीत आर्त्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् । उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो ! भगवन्नमस्ते । तं वीक्ष्य पीडितमजः सहसाऽवतीर्य्य स ग्राहमाशु सरसः कृपयोज्जहार । ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं सम्पश्यतां हरिरमूमुचदुच्छ्रियाणाम्" ।

गजेन्द्रमोक्षणरूपस्य हरिचरितस्य श्रवणे फलमाह "एतन्महाराज ! तवेरिता मया कृष्णानुभावो गजराजमोक्षणम् । स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य ! शृण्वताम् । यथानुकीर्त्तयन्त्येतच्छ्रेयस्कामा द्विजातयः । शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये" । तद्गजेन्द्रकृतस्तवमाहात्म्यमपि तत्रैवोक्तं यथा "ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये । तेषां प्राणात्यये चाहं ददामि विमलां मतिम्" तं प्रति हरेर्वरदानम् ।

**गजेष्टा** स्त्री गजानामिष्टा । विदार्य्याम् भूमिकुष्माण्डे राजनि० ।

**गजोदर** पु० गजस्योदरमिवोदरमस्य । दैत्यभेदे हरिवं०। गजाशिरःशब्दे दृश्यम् । [ राजनि० ।

**गजोषणा** स्त्री गजोपपदा ऊषणा । गजपिप्पल्याम् ।

**गञ्ज** पु० गजि–घञ् । १अवज्ञायाम् हेमच० । आधारे घञ् । २गोष्ठागारे हारा०। ३भाण्डागारे ४खनौ मेदि० । ५पामरगृहे, ६हट्टस्थाने, ७मद्यभाण्डे, शब्दरत्ना० ८मदिरागृहे स्त्री टाप् अमरः ।

**गञ्जन** त्रि० गजि–खने णिच्–ल्यु । तिरस्कारके "नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयम्" सा० द० । "युष्मत्कृते खञ्जनगञ्जनाक्षि ! शिरोमदीयं यदि याति यातु" उद्भटः । "अलिकुलगञ्जनमञ्जनकम्"गीतगो० ।

**गञ्जिका** स्त्री गञ्जैव स्वार्थे क । मदिरागृहे शब्दर० ।

**गड़** सेके भ्वा० पर० सक० सेट् । गडति अगाडीत्-अगडीत् । जगाड घटा० । गडयति-ते ।

**गड़** वदनैकदेशे (गण्डव्यापारे) इदित् भ्वा० पर० अक०सेट् । गण्डति अगण्डीत् । जगण्डः गण्डः । गण्डूषः ।

**गड़** पु० गड–सेके अच् । (गडुइ) गरघ्नीनामके मत्स्यभेदे । "गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिकृद्बल्या दीपनी बलवीर्य्यकृत्" भावप्र० । तस्य पाकविशेषे गुणा उक्ता वैद्यके "पुच्छशीर्षेण रहिताः कासमर्द्दविमर्द्दिताः । हिङ्गुतैले च संतप्ता गडमत्स्यस्य खण्डकाः । गडो वातहरो बल्यो हृद्यः पथ्योऽग्निवर्द्धनः । सुरुच्यः शुक्रदोऽत्यर्थं किञ्चित् कफकरः सरः" २अन्तराये मेदि० । ३परिखायां ४व्यवधाने शब्दर० । ५देशभेदे शाम्बरे राजनि० । गड–संज्ञायां कन् । गडक (गडुइ) मत्स्यभेदे अमरः ।

**गड़देशज** न० गडदेशे शाम्बरदेशे जायते जन-ड । शाम्बरदेशजातलवणे राजनि० ।